**द्वितीयसत्रम् (आदर्शप्रश्नपत्रम्)**
**विषयः – संस्कृतम्**
**कक्षा – अष्टमी (नवनिष्ठा)**

समयः – सार्द्धहोराद्वयम् पूर्णांकाः 50

नाम———————— विभाग————————— अनुक्रमांक————————

**खण्ड : 'क' (अपठित–अवबोधनम्)**

1. गद्यांशं पठित्वा प्रश्नान् उत्तरत :–

तत्र एका महिला अस्ति। महिला मृगं पश्यति। महिलायाः एका कन्या अस्ति। तस्याः नाम गीता अस्ति। गीता गीतं गायति। महिला भोजनं खादति। तत्र कृषकः अपि अस्ति। सः आम्रं खादति।

(i) रिक्तस्थानानि पूरयत :– 1×5

(1) तत्र ______________ महिला अस्ति। (एका / त्रयः)

(2) तस्याः नाम ______________ अस्ति। (सीता / गीता)

(3) महिला ____ज____ खादति

(4) गी____ गीतं गायति।

(5) तत्र कृ_________ अपि अस्ति।

(ii) मेलनं कुरूत :– 1×5

| | |
|---|---|
| (1)  एका | कन्या अस्ति। |
| (2)  गीता | खादति। |
| (3)  सः | महिला अस्ति। |
| (4)  महिलायाः | आम्रं खादति। |
| (5)  महिला भोजनं | गीतं गायति। |

## खण्ड : 'ख' (रचनात्मक–लेखनम्)

2. चित्रं दृष्ट्वा मंजूषातः पदानि च चित्वा कथां पूरयत :– 1×4

| |
|---|
| मंजूषा :– अल्पं, घटं, जलं, काकः |



एकदा एकः ___________ पिपासितः आसीत्। सः ___________ पातुम् इतस्ततः अभ्रमत्। अन्ते सः एकं ___________ अपश्यत्। घटे ___________ जलं आसीत्।

3. चित्रं दृष्ट्वा मंजूषातः पदानि च चित्वा रिक्तस्थानानि पूरयत :–



| |
|---|
| मंजूषा :– उड्डयन्ति, द्वे, बालकः, सूर्यः |

(i) चित्रे ___________ वृक्षे स्तः। ___________ उदेति। खगाः ___________। चित्रे ___________ न अस्ति।

## खण्ड : 'ग' (अनुप्रयुक्त–व्याकरणम्)

4. उचितां विभक्तिं चित्वा लिखत :– 1×3

(i) चन्द्रस्य – षष्ठी / चतुर्थी [ ]

(ii) परम्परया – तृतीया / सप्तमी [ ]

(iii) मतिम् – पंचमी / द्वितीया [ ]

5. उचितं लकारं चित्वा लिखत :– 1×3

(i) सा शिक्षिका <u>अस्ति</u>। [ ]
लट् / लृट्

(ii) बालिकाः गृहं <u>गच्छन्ति</u>। [ ]
लोट् / लट्

(iii) रमेशः भोजनम् <u>अखादत्</u>। [ ]
लङ् / लट्

6. सन्धिं विच्छेदं वा कुरूत :– 1×2

(i) सूर्याचलः = __________ + अचलः (सूर्य / सूर्या)

(ii) __________ = तथा + एव (तथैव / तथाव)

7. उपसर्गं चित्वा लिखत :– 1×2

(i) विहरति __________ (वा / वि)

(ii) आदाय __________ (आ / आद)

8. कोष्ठकात् प्रत्ययं चित्वा लिखत :– 1×2

(i) गम् + __________ = गत्वा (तुमुन्, क्त्वा)

(ii) पठ् + __________ = पठितुम् (तुमुन्, क्त्वा)

## खण्ड : 'घ' (पठित–अवबोधनम्)

9. गद्यांशं पठित्वा प्रश्नान् उत्तरत :– 1×4

एका शिक्षिका गृहात् पुस्तकानि आदाय चलति। मार्गे कश्चित् तस्याः उपरि धूलिं कश्चित् च प्रस्तरखण्डान् क्षिपति। परं सा स्वदृढ़निश्चयात् न विचलति।

(i) कति शिक्षिका आसीत्?
(क) एका (ख) तिस्रः ☐

(ii) का पुस्तकानि आदाय चलति?
(क) शिक्षिका (ख) गृहात् ☐

(iii) सा स्वदृढ़निश्चयात् विचलति?
(क) आम् (ख) न ☐

(iv) कश्चित् तस्याः उपरि धूलिं क्षिपति?
(क) आम् (ख) न ☐

10. पद्यांशं पठित्वा मेलनं कुरूत :– 1×4

साहित्यसंगीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानः
तद्भागधेयं परमं पशूनाम्।।

| क | ख |
|---|---|
| (i) तृणं न | • पुच्छविषाणहीनः |
| (ii) साहित्यसंगीत | • परमं पशूनाम् |
| (iii) तद्भागधेयं | • खादन्नपि जीवमानः |
| (iv) साक्षात्पशुः | • कलाविहीनः |

11. विलोमपदानि मेलयत :– 1×4

| | |
|---|---|
| (i) उदयः | • अचलः |
| (ii) चलः | • प्रकाशः |
| (iii) अन्धकारः | • नीचैः |
| (iv) उपरि | • अस्तः |

12. मंजूषातः पदानि चित्वा तद्भवशब्दानां कृते संस्कृतपदानि लिखत :– 1×4

| लुब्धः, मधुमक्षिका, पुच्छः, तृणम् |
|---|

(i) मधुमक्खी __________

(ii) तिनका __________

(iii) लोभी __________

(iv) पूँछ __________

13. चित्राणि दृष्ट्वा नामानि लिखत :– 1×4

| पुस्तकानि, प्रस्तरखण्डानि, पाठशाला, कूपः |
|---|



(i) __________



(ii) __________



(iii) __________



(iv) __________

## द्वितीयसत्रम् (आदर्शप्रश्नपत्रम्)
## विषयः – संस्कृतम्
## कक्षा – अष्टमी (निष्ठा)

समयः – सार्द्धहोराद्वयम् पूर्णांकाः 50

### खण्ड : 'क' (अपठित–अवबोधनम्)

1. गद्यांशं पठित्वा प्रश्नान् उत्तरत :–

उद्याने एकः बालकः अस्ति। बालकः वृक्षं पश्यति। वृक्षस्य उपरि खगाः सन्ति। उद्याने एका बालिका अपि अस्ति। बालिका नृत्यं करोति। खगाः इतस्ततः उड्डयन्ति। आकाशे सूर्यः उदेति।

(i) एकपदेन उत्तरत :– 1×2

(1) बालकः कं पश्यति?

(2) सूर्यः कुत्र उदेति?

(ii) पूर्णवाक्येन उत्तरत :– 2×2

(1) खगाः कुत्र सन्ति?

(2) बालिका किं करोति?

(iii) निर्देशानुसारम् उत्तरत :– 1×2

(1) 'एकः बालकः' अत्र विशेषणपदं किम्?

(क) बालकः (ख) अत्र (ग) एकः (घ) किम्

(2) तत्र एकः ———— अस्ति।

(क) एकः (ख) बालकः (ग) तत्र (घ) अस्ति

(iv) अनुच्छेदस्य उचितं शीर्षकं लिखत। 2×1

### खण्ड : 'ख' (रचनात्मक–लेखनम्)

2. मंजूषातः पदानि चित्वा पत्रे रिक्तस्थानानि पूरयत :– 1×4

(1) ————

प्राचार्यमहोदयः

केन्द्रीयविद्यालयः, गाँधीनगरम्

श्रीमन्

सविनयं निवेदयामि यत् अहं भवतः विद्यालये अष्टम्यां (2) ———— पठामि। मम पितुः मासिकं (3) ———— पंचसहस्त्ररूप्यकाणि अस्ति येन परिवारस्य कार्यम् न चलति। अतः अहं (4) ———— प्रार्थनां करोमि। आशासे भवान् मम प्रार्थनां स्वीकरिष्यति।

भवताम्

सुरेशः

(**मंजूषा** :–सेवायाम्, शुल्कक्षमापनार्थं, वेतनम्, कक्षायां)

3 1×4



**मंजूषा** :– प्रसन्नाः, सुन्दरम्, बालकाः, कन्दुकेन, त्रयः, क्रीडाक्षेत्रम्, वृक्षाः विद्यालयम्, विशालम्

## खण्ड : 'ग' (अनुप्रयुक्त–व्याकरणम्)

4. अधोलिखितानां पदानां विभक्तिं वचनं च लिखत। 1×3

| | विभक्तिः | वचनम् |
|---|---|---|
| (i) युद्धे | ––––––– | ––––––– |
| (ii) शक्रस्य | ––––––– | ––––––– |
| (iii) बलवन्तम् | ––––––– | ––––––– |

5. उदाहरणानुसारं लकारपरिवर्तनं कुरूत :– 1×3

यथा :– सः शिक्षकः अस्ति। (आसीत्/आसन्)

सः शिक्षकः आसीत्।

(i) ते बालकाः गृहं गच्छन्ति। (अगच्छन्/अगच्छम्)

(ii) वयं पुस्तकं पठामः। (अपठत्/अपठाम)

(iii) महिलाः जलं नयन्ति। (अनयथ/अनयन्)

6. सन्धिं विच्छेदं वा कुरूत :– 1×2

(i) तथैव = –––––– + ––––––

(ii) ––––––– = ग्रन्थः + अयम्

7. उपसर्गं चित्वा लिखत :– 1×2

(i) उपहरति (उप/हर)

(ii) परिहरति (हर/परि)

8. प्रकृतिप्रत्ययौ मंजूषातः चित्वा लिखत :– 1×2

(i) नेतुम् –

(ii) हसित्वा –

नी, क्त्वा
तुमुन, हस्

## खण्ड : 'घ' (पठित–अवबोधनम्)

9. गद्यांशं पठित्वा प्रश्नान् उत्तरत :–

पूर्वदिशायाम् उदेति सूर्यः पश्चिमदिशायां च अस्तं गच्छति इति दृश्यते हि लोके। परं न अनेन अवबोध्यमस्ति यत्सूर्यो गतिशील इति। सूर्यः अचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति।

(i) एकपदेन उत्तरत :– 1×2

(1) का चला?

(2) कः अचलः?

(ii) पूर्णवाक्येन उत्तरत :– 1×1

(1) सूर्यः कुत्र अस्तं गच्छति?

(iii) निर्देशानुसारं उत्तरत :– 1×1

(1) 'सूर्यो गतिशील इति' अत्र अव्ययपदं किम्?

(क) सूर्यो (ख) इति (ग) अस्ति (घ) गतिशील

10. श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत :–

सीमन्तिनीषु का शान्ता?
राजा कोऽभूत गुणोत्तमः?
विद्वद्भिः का सदा वन्द्या?
अत्रैवोक्तं न बुध्यते।।

(i) एकपदेन उत्तरत :– 1×2

(1) गुणोत्तमः राजा कः अभवत्?

(2) सीमन्तिनीषु का शान्ता?

(ii) पूर्णवाक्येन उत्तरत :– 1×1

(1) विद्दभिः का सदा वन्द्याः?

(iii) निर्देशानुसारं उत्तरत :– 1×1

(1) 'विद्वद्भिः' अत्र का विभक्तिः?

(क) प्रथमा (ख) चतुर्थी (ग) तृतीया (घ) सप्तमी

11. रेखांकितपदानां स्थाने उचितपदं चित्वा प्रश्ननिर्माणं कुरूत :– 1×4

(i) लुब्धस्य यशः नश्यति। (कस्य / केन)

(ii) नद्यः सुस्वादुतोयाः भवन्ति। (काः / काम्)

(iii) सूर्यः पूर्वदिशायाम् उदेति। (कः / कौ)

(iv) भोजनान्ते तक्रं पेयम्। (किम् / कस्य)

12. तद्भवशब्दानां कृते संस्कृतपदानि लिखत :– 1×4

(i) लोभी –––––––

(ii) मधुमक्खी –––––––

(iii) पूँछ –––––––

(iv) तिनका –––––––

13. चित्रैः सह पदानां मेलनं कुरूत :– 1×4

(i) 

(ii) 

(iii) 

(iv) 

- वृक्षः
- सिंहः
- सूर्यः
- समुद्रम्

**द्वितीयसत्रम् (आदर्शप्रश्नपत्रम्)**
**विषयः – संस्कृतम्**
**कक्षा – अष्टमी (प्रतिभा)**

समयः – सार्द्धहोराद्वयम् पूर्णांकाः 50

**खण्ड : 'क' (अपठित–अवबोधनम्)**

1. अनुच्छेदं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत :–
जीवनस्य प्रथमः कालः ब्रह्मचर्यकालः कथ्यते। एषः कालः विद्यार्थीजीवनमपि मन्यते। अस्मिन् काले विद्यार्थिनः परमं लक्ष्यं विद्याप्राप्तिरेव विद्यते। यदि कश्चिद् जनः अस्मिन् काले विद्यार्जनं न करोति, सः कदापि पुनः विद्याप्राप्तिः कर्तुं समर्थः न भवति। अस्माकं ऋषिभिः सम्पूर्णं जीवनं चतुर्धा विभक्तम् कृतम्। प्रथमः ब्रह्मचर्य कालः, द्वितीयः कालः गृहस्थाश्रमः, तृतीयः कालः वानप्रस्थाश्रमः चतुर्थः कालः सन्यासाश्रमः च कथ्यते। प्रथमः कालः सर्वेषाम् आश्रमाणाम् आधारः वर्तते। यदि आधारः सुदृढ़ः भवति, तदा तस्योपरि ये आश्रमाः सन्ति तेऽपि सम्यक्तया प्रचलन्ति।

(i) एकपदेन उत्तरत :– 1×2
(1) जीवनस्य प्रथमः कालः कः कथ्यते?
(2) अस्माकं सम्पूर्णं जीवनं कतिधा विभक्तम्?

(ii) पूर्णवाक्येन उत्तरत :– 2×2
(1) सर्वेषाम् आश्रमाणाम् आधारः कः कालः?
(2) विद्यार्थिनः परमं लक्ष्यं किं विद्यते?

(iii) निर्देशानुसारम् उत्तरत :– 1×2
(1) 'समयः' इत्यस्य पर्यायपदं अत्र किं प्रयुक्तम्?
(क) प्रथमः (ख) परमं (ग) कालः (घ) आधारः
(2) 'परमं लक्ष्यम्' अनयोः पदयोः किं विशेष्यपदम्?
(क) विद्यार्थिनः (ख) परमं (ग) लक्ष्यम् (घ) आधारः

(iv) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत। 2×1

**खण्ड : 'ख' (रचनात्मक–लेखनम्)**

2. भवतः नाम हार्दिकः अस्ति। अधोलिखितमंजूषातः उचितानि पदानि गृहीत्वा शुल्कक्षमापनार्थं लिखितेऽस्मिन् पत्रे रिक्तस्थानानि पूरयत :– 4

श्रीमान् प्राचार्यः महोदयः,
सर्वोदयः विद्यालयः,
पण्डारा रोडस्थ,
नवदिल्लीतः।
श्रीमन् (1) ––––––––
सविनयं निवेदयामि यत् अहं भवतः (2) –––––––– अष्टम्यां कक्षायाम् पठामि। मम (3) –––––––– एकस्मिन् कार्यालये लिपिकः अस्ति। तस्य मासिकं (4) –––––––– केवलं पंचसहस्ररूप्यकाणि अस्ति। मम एकः भ्राता पंचम्यां कक्षायां पठति। गृहे (5) –––––––– भगिनी अपि अस्ति। पितुः स्वल्पेन अनेन वेतनेन (6) –––––––– कार्यं न चलति। अतः अहं (7) –––––––– प्रार्थनां करोमि। आशासे भवान् मम प्रार्थनां स्वीकरिष्यति।

भवताम् (8)–––––––––
हार्दिकः

**मंजूषा** :– वेतनं, एका, सम्यक्, प्रधानाचार्यः, पिता, आज्ञाकारी शिष्यः, विद्यालये, शुल्कक्षमापनार्थं

3. चित्रं दृष्ट्वा मंजूषायाः प्रदत्तपदानां सहायतया संस्कृतेन चत्वारि वाक्यानि लिखत :– 1×4



| |
|---|
| मंजूषा :– जनाः, मनोहरं, नौकाविहारं, प्रसन्नताम्, भ्रमन्ति, लवणयुक्तम्, समुद्रतटे, कुर्वन्ति, विशालः, भवनानि, अनुभवन्ति |

**खण्ड : 'ग' (अनुप्रयुक्त–व्याकरणम्)**

4. अधोलिखितपदयोः लिंग, विभक्तिं वचनं च लिखत :– ½×6

| पदानि | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|
| शक्रस्य | ——— | ——— | ——— |
| कन्यानाम् | ——— | ——— | ——— |

5. अधोलिखितानां पदानां लकारं पुरूषं वचनं च लिखत :– 1×3

| | पदानि | धातुः | लकारः | पुरूषः | वचनम् |
|---|---|---|---|---|---|
| (i) | पश्य | ——— | ——— | ——— | ——— |
| (ii) | कुर्मः | ——— | ——— | ——— | ——— |
| (iii) | आगच्छ | ——— | ——— | ——— | ——— |

6. उपसर्गं पृथक्कृत्वा लिखत :– ½×4

(i) निर्गच्छति

(ii) अनुभवति

(iii) संहरति

(iv) प्रविशति

7. रेखांकितपदयोः प्रकृतिप्रत्ययौ विभज्य लिखत :– 1×2

(i) बालकः <u>क्रीडितुम्</u> इच्छति। (—— + ——)

(ii) विद्यालयं <u>गत्वा</u> लता प्रसन्ना अस्ति। (—— + ——)

8. सन्धिं/सन्धिविच्छेदं वा कुरूत :– ½×4

(i) समानम् + अपि = ————

(ii) सर्वमेव = —— + ——

(iii) ग्रन्थोऽयम् = —— + ——

(iv) तथा + एव = ————

## खण्ड : 'घ' (पठित–अवबोधनम्)

9. अधोलिखितगद्यांशं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत :–

सामाजिककुरीतीनां सावित्री मुखरं विरोधम् अकरोत्। विधवानां शिरोमुण्डनस्य निराकरणाय सा साक्षात् नापितैः मिलिता। फलतः केचन् नापिताः अस्यां रूढ़ौ सहभागिताम् अत्यजन्। एकदा सावित्र्या मार्गे दृष्टं यत् कूपं निकषा शीर्णवस्त्रावृताः तथाकथिताः निम्नजातीयाः काश्चित् नार्यः जलं पातुं याचन्ते स्म। उच्चवर्गीयाः उपहासं कुर्वन्तः कूपात् जलोद्धरणम् अवारयन्। सावित्री एतत् अपमानं सोढुं नाशक्नोत्। सा ताः स्त्रियः निजगृहं नीतवती। तडागं दर्शयित्वा अकथयत् च यत् यथेष्टं जलं नयत। सार्वजनिकोऽयं तडागः। अस्मात् जलग्रहणे नास्ति जातिबन्धनम्। तया मनुष्याणां समानतायाः स्वतंत्रतायाश्च पक्षः सर्वथा समर्थितः।

(i) एकपदेन उत्तरत :– 1×2

(1) का साक्षात् नापितैः मिलिता?

(2) कः सार्वजनिको अस्ति?

(ii) पूर्णवाक्येन उत्तरत :– 1×1

(1) कीदृशीनां कुरीतीनां सावित्री विरोधम् अकरोत्?

(iii) निर्देशानुसारं उत्तरत :– 1×1

(1) 'एतत् अपमानं' अनयोः पदयोः विशेषणपदम् किम्?

10. श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत :–

सीमन्तिनीषु का शान्ता?
राजा कोऽभूत गुणोत्तमः?
विद्वद्भिः का सदा वन्द्या?
अत्रैवोक्तं न बुध्यते।।

(i) एकपदेन उत्तरत :– 1×2

(1) सीमन्तिनीषु का शान्ता?

(2) गुणोत्तमः राजा कः?

(ii) पूर्णवाक्येन उत्तरत :– 1×1

(1) विद्दभिः सदा का वन्द्याः?

(iii) निर्देशानुसारं उत्तरत :– 1×1

(1) 'राजा कोऽभूत गुणोत्तमः' इत्यस्मिन् वाक्ये किं विशेष्यपदम्?

11. नाट्यांशं पठित्वा प्रश्नान् उत्तरत :–

| | | |
|---|---|---|
| परमिन्दर | – | अरे ! उपवनस्य द्वारे एव प्लास्टिकस्यूतकानि क्षिप्तानि इतस्ततः विकीर्णानि। |
| कचनार | – | जनाः प्रमादं कुर्वन्ति। प्लास्टिकपुटकेषु खाद्यवस्तूनि गृहीत्वा भक्षयन्ति, परं तानि पुटकानि मार्गे यत्र कुत्रापि क्षिपन्ति। |
| रोजलिन | – | महती इयं समस्या। अपि प्रविशामः? |
| रिपञ्ची | – | अस्तु प्रविशामः<br>(सर्वाः उपवने प्रविशन्ति) |
| कचनार | – | कुत्र उपविशामः? |
| रिपञ्ची | – | अस्मिन् काष्ठपीठे उपविशामः। |

(i) एकपदेन उत्तरत :— 1×2

(1) उपवनस्य द्वारे कानि क्षिप्तानि?

(2) के प्रमादं कुर्वन्ति?

(ii) एकवाक्येन उत्तरत :— 1×1

(1) जनाः खाद्यवस्तूनि भक्षयित्वा कुत्र क्षिपन्ति?

(iii) निर्देशानुसारम् उत्तरत :— 1×1

(1) 'प्लास्टिकानि स्यूतकानि' अत्र किं विशेषणपदम्?

12. विलोमपदानि लिखत :— 1×4

(i) स्थिरः

(ii) समादरः

(iii) उपरि

(iv) परकीयम्

13. श्लोकांशान् योजयत :— 1×4

| | |
|---|---|
| (i) कः सञ्जघान कृष्णः | • अत्रैवोक्तं न बुध्यते। |
| (ii) किं कुर्यात् कातरो युद्धे | • तक्रं शक्रस्य दुर्लभम्। |
| (iii) कथं विष्णुपदं प्रोक्तं | • का शीतलवाहिनी गंगा। |
| (iv) विद्वद्भिः का सदा वन्द्या | • मृगात् सिंहः पलायते। |